# वसुदेव सुतं देवं

श्री कृष्णाष्टकम्
===========
वसुदेव सुतं देवं, कंस चाणूर मर्दनम् ।
देवकी परमानंदं, कृष्णं वंदे जगद्गुरुम् ॥ 1 ॥

अतसी पुष्प संकाशं, हार नूपुर शोभितम् ।
रत्न कंकण केयूरं, कृष्णं वंदे जगद्गुरुम् ॥ 2 ॥

कुटिलालक संयुक्तं, पूर्णचंद्र निभाननम् ।
विलसत् कुंडलधरं, कृष्णं वंदे जगद्गुरम् ॥ 3 ॥

मंदार गंध संयुक्तं, चारुहासं चतुर्भुजम् ।
बर्हि पिंछाव चूडांगं, कृष्णं वंदे जगद्गुरुम् ॥ 4 ॥

उत्फुल्ल पद्मपत्राक्षं, नील जीमूत सन्निभम् ।
यादवानां शिरोरत्नं, कृष्णं वंदे जगद्गुरुम् ॥ 5 ॥

रुक्मिणी केलि संयुक्तं, पीतांबर सुशोभितम् ।
अवाप्त तुलसी गंधं, कृष्णं वंदे जगद्गुरुम् ॥ 6 ॥

गोपिकानां कुचद्वंद, कुंकुमांकित वक्षसम् ।
श्रीनिकेतं महेष्वासं, कृष्णं वंदे जगद्गुरुम् ॥ 7 ॥

श्रीवत्सांकं महोरस्कं, वनमाला विराजितम् ।
शंखचक्र धरं देवं, कृष्णं वंदे जगद्गुरुम् ॥ 8 ॥

कृष्णाष्टक मिदं पुण्यं, प्रातरुत्थाय यः पठेत् ।
कोटिजन्म कृतं पापं, स्मरणेन विनश्यति ॥

अपलोडर- अनिलरामूर्तिभोपाल

https://www.bhajanganga.com/bhajan/lyrics/id/28585/title/vasudeva-sutam-devam

अपने Android मोबाइल पर BhajanGanga App डाउनलोड करें और भजनों का आनंद ले |